CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋतुसंहारकाव्यम्

RITU-SAMHARA

OR

AN ACCOUNT OF SEASONS

TRANSLATED INTO ENGLISH

BY

H. H. WILSON

EDITED BY

Prof. REWA PRASAD DWIVEDI M.A

891.2
W R

4081

INDOLOGICAL BOOK HOUSE
CK. 31/10 NEPALI KHAPARA
VARANASI (INDIA)
1966

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋतुसंहारकाव्यम्

RITU-SAMHARA

OR

AN ACCOUNT OF SEASONS

TRANSLATED INTO ENGLISH

BY

H. H. WILSON

EDITED BY

Prof. REWA PRASAD DWIVEDI M.A

INDOLOGICAL BOOK HOUSE
CK. 31/10 NEPALI KHAPARA
VARANASI (INDIA)
1966

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Published by
Rameshwar Singh, for
Indological Book House
CK 31/10 Nepali khapara,
Varanasi (INDIA)

891.2
W R
4081

All Rights reserved
Rs. 1.50



Printed by-
Vidya Bhushana Press
Varanasi

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्री ॥

महाकविकालिदासविरचितम्

ऋतुसंहारकाव्यम्

RITU SAMHARA

A DESCRIPTOIN OF THE SUMMER.

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षतवारिसंचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये ॥१॥

O DEAR, of late the Summer has set in when the rays of the sun become very fierce, the clear and cool rays of the moon are sought, the watery contents of big ponds become scanty for people continually bathing there and the force of Cupid becomes lessened. 1

निशाः शशाङ्क-क्षतनीलराजयः क्वचिद् विचित्रं जलयन्त्र-मन्दिरम् ।
मणिप्रकाराः सरस च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥२॥

During this season people are fond of moon-lit nights. water houses, various jewels and sandalpaste. 2

सुवासितं हर्म्यतलं मनोहरं प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः ॥३॥

During summer nights seated at ease in sweetscented and charming mansions, men enjoy the nectar of lips shaken by the air of the mouth and sweet music of Vina set in tunes. 3

नितम्बबिम्बैः सदुकूलमेखलैः स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामिनाम् ॥४॥

With waists decorated with chains, breasts pasted with sandal and bedecked with necklace, and tresses perfumed with charming scents, beautiful damsels remove the summer sufferings of the males. 4

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नितान्तलाक्षारसरागलोहितैर्नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथम् ॥५॥

Dying their feet with deep red-dyes the beautiful waisted damsels beautify the Nupuras making sound sweet to the ears like swans. Their every foot-step increases the passion of men. 5

पयोधराश्चन्दनपङ्कचर्चितास्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकम् ॥६॥

Look, O dear, whose calm mind is not agitated with sentiments of love on seeing the rising breasts of damsels pasted with sandal, their breasts adorned with necklaces and their waists bedecked with golden chains ? 6

समुद्गतस्वेदचिताङ्गसन्धयो विमुच्य वासांसि गुरूणि साम्प्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना निवेशयन्ति प्रमदाः सयौवनाः ॥७॥

Always perspiring heavily the youthful damsels, with pointed breasts, cast off thick-set clothes and cover their breasts with thin ones. 7

सचन्दनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिःस्वनैर्विबोध्यते सुप्त इवाद्य मन्मथः ॥८॥

By means of the wind of fans soaked with sandal water, by means of touching the breasts covered with necklaces of women and by the sweet music of Vina, even the sleeping sentiment of love in men's minds is excited. 8

सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नूनं भृशमुत्सुकश्चिरं निशाक्षये याति ह्रियेव पाण्डुताम् ॥९॥

Seeing the faces of women lying asleep in night at white mansions and chastising his own beauty, the moon, filled with shame, becomes pale in the morning. 9

असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः ॥१०॥

The earth is stricken with the fierce heat of the sun, the dust is raised by the terrible wind. Even persons, living in

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

strange countries and having their minds consumed by the fire of separation from their loves, cannot look at it. 10

मृगाः प्रचण्डातपतापिताभृशं तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥११॥

Greatly assailed by the heat of the sun and with tongues dried up by thirst the deer are looking up to the blue sky mistaking it for a pond. 11

सविभ्रमैः सस्मितजिह्मवीक्षितैर्विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसंदीपनमाशु कुर्वते यथा प्रदोषाः शशिचारुभूषणाः ॥१२॥

The glances of sportive women, accompauied with smiles like unto the moon-lit night were creating desire in the minds of men living apart from their wives. 12

रवेर्मयूखैरभितापितो भृशं विदह्यमानः पथि तप्तपांशुभिः ।
अवाङ्मुखोऽजिह्मगतिः श्वसन्मुहुः फणी मयूरस्य तले निषीदति ॥१३॥

Assailed with excessive heat and scorched with the heated dust the serpents, sighing heavily, and with their hoods bent, are taking shelter under the shade of the peacock's feathers 13

तृषा महत्या हतविक्रमोद्यमः श्वसन्मुहुर्दूरविदारिताननः ।
न हन्त्यदूरेऽपि गजान् मृगेश्वरो विलोलजिह्वश्चलिताग्रकेशरः ॥१४॥

The lions have become weak and shorn of energy with thirst. They are breathing hard and lying on earth with their mouths wide open. Their tongues are shaking with thirst. Their manes are trembling. And even seeing the elephants near, they are not rising up to kill them. 14

विशुष्ककण्ठाहृतसीकराम्भसो गभस्तिभिर्भानुमतोऽनुतापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो न दन्तिनः केसरिणोऽपि बिभ्यति ॥१५॥

With their throats dried up with thirst, stricken with thirst and heat not getting even a drop of water they are running about hither and thither in search of it and are not terrified at seeing a lion. 15

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हुताग्निकल्पैः सवितुर्गभस्तिभिः कलापिनः क्लान्तशरीरचेतनाः ।
न भोगिनं घ्नन्ति समीपवर्तिनं कलापचक्रेषु निवेशिताननम् ॥१॥

The body and the mind of the peacocks have been greatly assailed with the fierce rays of the sun like unto fire increased by sacificrial offerings. Though the serpents are taking shelter under their tails, they are not killing them. 16

सभद्रमुस्तं परिशुष्ककर्दमं सरः खनन्नायतपोत्रमण्डलैः ।
रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलम् ॥१७॥

Greatly assailed with heat the boars with their long mouths are digging the dried mud of the tanks as if they are seeking shelter in the nether region in search of cold water. 7

विवस्वता तीक्ष्णतरांशुमालिना सपङ्कतोयात् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति ॥१८॥

Assailed with heat the frogs are leaping up from heated and muddy water and are waiting under the fangs of snakes stricken with thirst. 18

समुद्धृताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः कृतं सरः सान्द्रविमर्दकर्दमम् ॥१९॥

Assailing one another and quarrelling amongst themselves the elephants are uprooting lotusesfrom the lake, killing the distressed fishes, driving away the terrified Sarasas and drying up the mud of the tank. 19

रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपतापितः फणी न हन्ति मण्डूककुलं तृषाकुलः ॥२०॥

The gem, set on the hood of the serpents, is being lighted up with the rays of the sun. They are drinking air with their tongues. And distressed with fire of their venom, the heat of the sun and thirst they are not killing even the frogs. 20

सफेनलोलायतवक्त्रसंपुटं विनिःसृतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वरादवेक्ष्यमाणं महिषीकुलं जलम् ॥२१॥

From the trembling mouth of the buffaloes reddened tongues

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

covered with foams, are coming out l.c. And stricken with thirst and seeking water with their faces turned up they are coming out of the mountain caves. 21

पटुतरदवदाहोच्छुष्कसस्यप्ररोहाः परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापक्षीणतोयाः समन्ताद् विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥

The green grass of the forest has been scorched by the forest-fire, dried leaves are being carried away by strong winds, the tanks are being dried up by the heat of the sun. To look to any side of the forest inspires one with fear. 22

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छञ्छरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥

Although a greater portion of leaves has fallen down from trees still sitting somehow on them the birds are breathing. Tired, the monkeys are seeking the groves of the mountains. The Sarabhas with great difficulty are taking up water from the wells. 23

विकचनवकुसुम्भस्वच्छसिन्दूरभासा प्रबलपवनवेगोद्धूतवेगेन तूर्णम् ।
तटविटपलताग्रालिङ्गनव्याकुलेन दिशि दिशि परिदग्धा भूमयः पावकेन ॥२४॥

Increased by the wind, fire, red like red lead or new blown Kusuma flowers, is consuming the earth as if being anxious to embrace the tops of trees and creepers. 24

ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः॥२५॥

Forest-fire being lighted and increased in mountain caves by the fierce wind, is with great sound entering into the forest of dried bamboos, is spreading on all sides in the midst of the heap of hay and touching the hairs of the deer is killing them. 25

बहुतर इव जातः शाल्मलीनां वनेषु स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखानुत्तून् प्रांशुवृक्षा भ्रमति पवनभूतः सर्वतोऽग्निर्वनान्ते ॥२६॥

Collected in a mass in the forest of Salmali trees,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the fire, spreading its golden rays, is blowing in the cavity of of trees. It is spreading up to its top on getting dried leaves and is moving about on all sides of the forest with the help of the wind. 26

गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः सुहृद इव समेता द्वन्द्वभावं विहाय।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद् विपुलपुलिनदेशान्निम्नगां संविशन्ति ॥२७॥

Assailed with the forest-fire, elephants, Gavayas, and lions, forgetting their enmity and behaving towards one another as friends, are going out of the forest scorched with the fire and taking shelter on the banks of the rivers are entering into them. 27

कमलबनचिताम्बुः पाटलामोदरम्यः सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः।
व्रजतु तव निदाघः कामिनीभिः समेतो निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥२८॥

Lotuses being unfolded in the lakes have put on a beautiful appearance and all the quarters have been perfumed with the smell of Patala flowers. At this time, plunging into cool water and clear rays of the moon are welcome unto people. The women, and to listen to sweet songs in summer are objects of great enjoyment. 28

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयः सर्गः

A DESCRIPTION OF THE RAINY SEASON.

स-शीकराम्भोधरमत्तकुञ्जरस्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये ॥ १ ॥

O dear, with the infuriated elephants in the shape of clouds surcharged with water, with flags in the form of lightnings and musical instruments in the shape of thunder, all favourite unto pleasure-seekers, the beautiful rainy season has appeared like a king. 1

नितान्तनीलोत्पलपत्रकान्तिभिः क्वचित् प्रभिन्नाञ्जनराशिसन्निभैः ।
क्वचित् सगर्भप्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्ततः ॥ २ ॥

Appearing somewhere like blue lotus, somewhere like ground collyrium and somewhere like breasts of pregnant women the clouds have covered the sky. 2

तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥

Pouring rain in torrents at the request of the thirst-stricken Chatakas and emitting slow mutterings pleasing to the ears, clouds, bent down by the weight of their watery contents, are slowly moving on. 3

बलाहकाश्चाशनिशब्दमर्दलाः सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकैस्तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥ ४ ॥

Making sounds of music with thunder, taking rainbow with the string of lightning set to it, and with the strokes of sharpened arrows in the shape of torrents, the clouds are agitating the minds of people. 4

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

With green grass which have grown like Vaidurya gems riving the earth, leaves of Kandali creepers and Indragopa insects the earth has been filled up. It appears as if prostitutes, bedecked with red gems, are sitting there. 5

सदा मनोज्ञं स्वनदुत्सवोत्सुकं विकोश-विस्तीर्णकलापशोभितम् ।
ससंभ्रमालिङ्गनचुम्बनाकुल प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥ ६ ॥

Maddened with joy the peacoks are emitting sweet notes. Sometimes they are unfolding their tails, sometimes showing anxiety to kiss and embrace their mates, and are again dancing. 6

निपातयन्त्यः परितस्तटद्रुमान् प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः सुदुष्टा इव जातविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥ ७ ॥

The rivers being filled up with the muddy water of the rains their force is increased. Therefore felling down the trees on both the banks, they, like unchaste women, are going quickly towards the ocean 7

तृणोत्करैरुद्गतकोमलाङ्कुरैर्विचित्रनीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥ ८ ॥

With tender green grass, remnants, after the deer have grazed on them, and with trees clothed with new leaves and and branches, the forests on the mount Vindhya are pilfering the minds of men. 8

विलोलनेत्रोत्पलशोभितानने मृगैः समन्तादुपजातसाध्वसः ।
समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रकरोति चेतसः ॥ ९ ॥

The sandy wild-region crowded by antelopes endowed with tremulous eyes like blue lotus is exciting curiosity in the mind. 9

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचः घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभा-दर्शितमार्ग-भूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ १० ॥

The clouds are always muttering dreadfully and have enshrouded the night with thick darkness. Still finding their way by the light of the lightning the unchaste women are going to their lovers. 10

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पयोधरैर्भीमगभीर-निःस्वनैस्तडिद्विरुद्धे जित-चेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम् ॥११॥

Surprised at the deep muttering of clouds and flashes of lightning the women are embracing again and again their offending husbands on the bed, 11

विलोचनेन्दीवरवारिबिन्दुभिर्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनाम् ॥१२॥

Sprinkling their lips with the water from their Kuvalaya-like eyes, and casting aside garlands, ornaments, scents etc, objects of enjoyments, the wives of absentee husbands are spending the night in despair. 12

विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद्वक्रगतिप्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवदोकम् ॥१३॥

The new rainy water spoiled with insects, dust and grass, flowing in a scrap pentine movement, and observed by a mass of terrified frogs ruhses downwards 13

विपन्नपुष्पां नलिनीं समुत्सुका विहाय भृङ्गाः श्रुतिहारिनिःस्वनाः ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया ॥१४॥

Leaving the full-blown lotuses. anxious to give honey, in expectation of new ones the insensible black-bees, humming sweetly; are sitting on the feathers of dancing peacocks mistaking them for lotuses. 14

वनद्विपानां नववारिदस्वनैर्मदान्वितानां ध्वनतां मुहुर्मुहुः ।
कपोलदेशा विमलोन्पलप्रभाः सभृङ्गयूथैर्मदवारिभिश्चिताः ॥१५॥

The rutting wild elephants are crying again and again at the muttering of new clouds. The black-bees are covering their temples for temporal juice. 15

सितोत्पलाभाम्बुदचुम्बितोपलाः समाचिताः प्रस्रवणैः समततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयन्ति भूधराः ॥१६॥

Clouds bent down by the water, are covering all the sides of the mountain. The fountains are filled with water and the peacocks are dancing in delight. With these objects of beauty the mountains are filling the minds of men with curiosity. 16

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कदम्बसर्जार्जुनकेतकीवनं विकम्पयंस्तत्कुसुमाधिवासितः ।
स-सीकराम्भोधरसङ्गशीतलः समीरणः कं न करोति सोत्सुकम् ॥१७॥

Whose mind is not being maddened by the breeze cooled by coming in contact with clouds surcharged with water, shaking the Kadamba, Sarja, Arjuna, and Ketaki trees and spreading the perfume of their flowers ? 17

शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः स्त्रियो रतिं संजनयन्ति कामिनाम् ॥१८॥

Spreading their tresses up to their waist and decorating their ears with sweet-scented flowers, the women, showing their breasts adorned with necklaces and faces smelling liquor, are exciting lust in the mind of lustful men. 18

तडिल्लताशक्रधनुर्विभूषिताः पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला हरन्ति चेतो युगपत्प्रवासिनाम् ॥१९॥

The clouds, bent down by the weight of water and accompanied with lightnings and rain-bows and the women, adorned with jewelled waist-bands and ear-rings, are simultaneously agitating the minds of men living apart from their wives. 19

मालाः कदम्बनवकेसरकेतकीभिरायोजिताः शिरसि बिभ्रति योषितोऽद्य ।
कर्णान्तरेषु ककुभद्रुममञ्जरीभिरिच्छानुकूलरचितानवतंसकांश्च ॥२०॥

Making garlands of sweet scented Ketaki, Kadamba and Keshara flowers and making ear-rings with the filaments of Arjuna flowers the pleasure-seeking women are decorating their heads and ears. 20

कालागुरुप्रचुरचन्दनचर्चिताङ्ग्यः पुंपावतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः॥२१॥

Perfuming their person with black Aguru sandal, putting on ear-rings of flowers and binding their tresses, the women, on hearing the muttering of clouds in the evening, are quickly leaving the apartments of their elders for their own bed-rooms. 21

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कुवलयदलनीलैरुन्नतैस्तोयनम्रैर्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः पथिकजनवधूनां तद्वियोगाकुलानाम् ॥२२॥

Shaken slowly by the breeze, the clouds, black like red lotuses; huge, bent down by water and adorned with lightnings and rain-bows, are pilfering the minds of women having travelling husbands. 22

मुदित इव कदम्बैर्जातपुष्पैः समन्तात् पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां नवसलिलनिषेकच्छिन्नतापो वनान्तः ॥२३॥

The heat of the forest has been removed by the sprinkling of new water and the Kadamba flowers have blossomed. It appears that the forest is experiencing horripillation out of joy. On the branches of trees being shaken by the wind, it appears, that the entire forest is dancing in delight. On the blossoming of Ketaka flowers it appears that the forest is smiling. 23

शिरसि बकुलमालां मालतीभिः समेतां विकसितनवपुष्पैर्यूथिकाकुड्मलैश्च ।
विकचनवकदम्बैः कर्णपूरं वधूनां रचयति जलदौघः कान्तवत्काल एषः ॥२४॥

Like unto a husband this rainy season has put on the heads of women garlands of Malati, Yuthika Bakula and other full blown wild flowers, and earrings of Kadamba flowers on their ears. 24

दधति वकुचाग्रैरुन्नतैर्हारयष्टिं प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकादुद्गतां रोमराजिं ललितवलिविभङ्गैर्मध्यदेशैश्च नार्यः ॥२५॥

During this season women carry chains on their rising breasts, thin cloths on their wide round hips, row of hairs horripilated owing to the rain-drops sprinkled on it, on the middle part of their body marked with three streaks. 25

नवजलकणसंगाच्छीततामादधानः कुसुमभरनतानां लासकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभिः परिहर त नभस्वान्प्रोषितानां मनांसि ॥२६॥

The wind bearing coolness being in cantact with the new water-drops, making the trees bent by the burden of flowers

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

dance, Scattering sweet fragrance of the pollens of ketaki, is pilfering the mind of travellers. 26

जलभरविनतानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥२७॥

Thinking "He is our refuge when we are bent down by the weight of water" the clouds are enlivening with torrents the mount Vindhya assailed with fierce heat (of the summer.) 27

बहुगुणरमणीयः कामिनीचित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एष प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥२८॥

O dear, may the rainy season, the pilferer of the heart o many a beautiful woman, the sincere friend of trees and creepers and the life of creatures,do you good ever and anon. 28

Note—Some amendment is made by us in translating the verses 25 and 26.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयः सर्गः ।

A DESCRIPTION OF THE AUTUMN.

काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या ।
आपक्कशालिरुचिरा तनुगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या ॥१॥

Clothed in a raiment of Kasa flowers, and making a sound of *nupuras* in the shape of the cries of maddened geese, the lotus-faced and the highly beautiful autumn has appeared like a newly wedded bride. Ripe paddies on all sides are appearing like her beautiful limbs. 1

काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः शुक्लीकृतान्युपवनानि च मालतीभिः ॥२॥

In this season the earth has been whitened with Kasa flowers, the night with the moon, the river with the swans and the lakes with Malati flowers. 2

चञ्चन्मनोज्ञशफरीरसनाकलापाः पर्यन्तसंस्थितसिताण्डजपंक्तिहाराः ।
नद्यो विशालपुलिनान्तनितम्बबिम्बा मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥३॥

Having fickle and beautiful Snaphari fishes for their tongues, the rows of swans sitting on their banks for neck-chains and the extensive banks for their waists the rivers are flowing slowly like inebriate women. 3

व्योम क्वचिद्गजतशंखमृणालगौरैस्त्यक्ताम्बुभिर्लघुतया शतशः प्रयासैः ।
संलक्ष्यते पवनवेगचलैः पयोदै राजेव चामरवरैरुपवीज्यमानः ॥४॥

Somewhere white like a conch or a lotus and fanned by cloud-like chowries, passing in hundred parts on being thinned by the pouring of water and shaken by the wind the sky is shining like a king 4

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं बन्धूकपुष्परचितारुणता च भूमिः ।
वप्राश्च पक्वकलमावृतभूमिभागाः प्रोत्कण्ठयन्ति न मनो भुवि कस्य यूनः ॥५॥

What youth is there whose mind is not attracted by this autumn in which the sky is beautiful like a mass of ground collyrium, the earth is sunny with Bandhuka flowers and the water are covered with beautiful lotuses ? 5

मन्दानिलाकुलितचारुतराग्रशाखः पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य न कोविदारः ॥६॥

The maddened black-bees are drinking the honey of Kovida trees, whose charming branches are being slowly shaken by the soft breeze and covered with tender leaves abounding in profuse flowers. Who is there, whose mind is not rent asunder by this spectacle ? 6

तारागणप्रवरभूषणमुद्वहन्ती मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥७॥

Clad in a raiment of clear rays and adorned with ornaments of stars, the moon-faced night, setting aside the veil of clouds is increasing day by day like a girl. 7

कारण्डवावलिविघट्टितवीचिमालाः कादम्बसारसचयाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य प्रीतिं परां कमलरेणुवृतास्तटिन्यः ॥८॥

The waves of the rivers are being broken by Karandavas. The banks are being covered with swans and Sarasas and the filaments of lotuses and the swans are emitting notes hither andthither. Whose mind is not delighted with seeing these beautiful sights ? 8

नेत्रोत्सवो हृदयहारिमरीचिमालः प्रह्लादकः शिशिरसीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां चन्द्रो दहत्यतितरां तनुमङ्गनानाम् ॥९॥

Adorned with rays giving joy to the eyes and stealing away minds, the dew-powing moon, ever producing delight of the mind, is assailing the persons of women assailed with the poisonous shafts of the death of their husbands. 9

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

आकम्पयन् फलभरानतशालिजालानानर्त्तयंस्तरुवरान् कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन् यूनां मनश्च लयति प्रसभं नभस्वान् ॥१०॥

Shaking the paddy creepers bent down with the weight of fruits, making the Karuvaka trees pressed down with the weight of flowers dance and shaking the full blown lotuses the wind is by force agitating the mind of young men. 10

सोन्मादहंसमिथुनैरुपशोभितानि स्वच्छप्रफुल्लकमलोत्पलभूषितानि ।
मन्दप्रभातपवनोद्गतवीचिमालान्युत्कण्ठयन्ति सहसा हृदयं सरांसि ॥११॥

Adorned with the pairs of maddened swans, pure and full blown lotuses and lillies, the lakes, in which waves have been caused by the soft morning breeze, are agitating suddenly the mind of all. 11

नष्टं धनुर्बलभिदो जलदोदरेषु सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नमो बालकाः पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥१२॥

The rainbow has disappeared in the clouds, the lightnings do not appear on the flag of the sky, the cranes do not shake the sky with the wind of their wings and the peacocks do not look up to the sky. 12

नृत्यप्रयोगरहिताञ्छिखिनो विहाय हंसानुपैति मदनो मधुरप्रगीतान् ।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान्सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥१३॥

Leaving the peacocks who have desisted from dancing, Kamadeva is approaching the swans emitting sweet notes, and leaving aside the Kadamba, Surja, Arjuna and Neepa trees is going to Saptachada trees. 13

शेफालिकाकुसुमगन्धमनोहराणि स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥१४॥

The gardens have been beautified with Shephalika flowers. Residing there the birds are emiting sweet notes with great glee. The eyes of the she-deer, living in the forest skirts, are looking like lotuses. Seeing these sights the minds of men are being greatly agitated. 14

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कह्लारपद्मकुमुदानि मुहुर्विधुन्वंस्तत्संगमादधिकशीतलतामुपेतः ।
उत्कण्ठयत्यतितरां पवनः प्रभाते पत्रान्तलग्नतुहिनाम्बुविधूयमानः ॥१५॥

Trembling the forests of Kalhara, lotus and lillies, becoming cooler in their contact and carrying dews placed on leaves the morning breeze is creating great agitation. 15

सपन्नशालिनिचयावृतभूतलानि स्वस्थस्थिततप्रचुरगोकुलशोभितानि
हंसैः स सारसकुलैः प्रतिनादितानि सीमान्तराणि जनयन्ति नृणां प्रमोदम् ॥१६॥

Covered with ripe paddy, beautified with kine grazing at ease and echoing with the notes of swans and Sarasas, the fields, situate on the village skirts, are gladdening the people. 16

हंसैर्जिता सुललिता गतिरङ्गनानामम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदकलानि विलोकितानि भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरङ्गैः ॥१७॥

The swans are imitating the charming gait of women, the fullblown lotuses the beauty of their face, the red lotuses their beautiful glances and the waves the charming gestures of their eye-brows. 17

श्यामा लताः कुसुमभारनतप्रवालाः स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।
दन्तावभासविशदस्मितचन्द्रकान्तिं । कङ्केलिपुष्परुचिरा नवमालती च ॥ ८॥

The leaves of Shyama creepers, bent down by the weight of flowers, are imitating the beauty of the adorned gems of woman and the garlands of Asoka flowers that of their smiles beautifying their lips. 18

केशान्नितान्तघननीलविकुञ्चिताग्रानापूरयन्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रवरकाञ्चनकुण्डलेषु नीलोत्पलानि विविधानि निवेशयन्ति ॥१९॥

The women are decorating their dark-blue tresses with new Malati flowers and putting on various red lotuses on their ears adorned with most excellent golden ear-rings. 19

हारैः सचन्दनरसैः स्तनमण्डलानि श्रोणीतटं सुविपुलं रसनाकलापैः ।
पादाम्बुजानि कलनूपुरशेखरैश्च नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति ॥२०॥

Filled with great delight the women are decorating their breasts with chain soaked in Sandal paste, their capacious waists

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

with Rasana chains and their feet with Nupuras making sweet sound. 20

स्फुटकुमुदचितानां राजहंससंस्थितानां मरकतमणिभासा वारिणा भूषितानाम् ।
श्रियमतिशयरूपां व्योम तोयाशयानां वहति विगतमेघं चन्द्रतारावकीर्णम् ॥२१॥

During this autumn the moon, freed from clouds, the sky bespangled with stars and the lakes covered with full blown lilies, adorned with swans and water clear like emerald are appearing highly beautiful. 21

शर दकुसुमसङ्गाद्वायवो वान्तशीता विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषसम्भः श्यानपङ्का धरित्री विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥

Cooled by coming in contact with flowers, the breeze blows in autumn. The quarters are freed of mud. The sky is adorned with clear rays of the moon and garland of stars. 22

दिवसकरमयूखैर्बोध्यमानं प्रभाते वरयुवतिमुखाभं पङ्कजं जृम्भतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥२३॥

In the morning of this season, the lotuses, unfolded by the rays of the sun, put on the beauty of the most youthful damsel. When the rays of the moon disappear the lilies fade away like the smiles of women whose husands are away. 23

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां पथिकजन इदानीं रोदिति भ्रान्तचित्तः ॥२४॥

Seeing the beauty of their wives' eyes in red lotuses, the beauty of their sounding gold ornaments in mad swans, the beauty of their lower lips in Bandhuka flowers, the travellers weep with their minds greatly agitated. 24

स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं काञ्चीं च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु क्वापि प्रयाति सुभगा शरदागमश्रीः ॥२५॥

Transferring the beauty of the moon to the countenances of women, the notes of the geese to the Nupuras, the beauty of Bandhuka flowers to the lips, the beautiful autumn is, as if, disappearing. 25

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना ।
कुमुदरुचिरकान्तिः कामिनीवोन्मदेयं
प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम् ॥२६॥

May this autumn, season with a countenance like a full blown lotus, with eyes like red lotuses, clothed in blossoming Kasa flowers like unto a white raiment, and smiling like lillies, give in profusion joy to your minds like an inebriate damsel. 26

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्थः सर्गः

A DESCRIPTION OF HEMANTA OR THE DEWY SEASON,

नवप्रवालोद्गमसस्यरम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः समुपागतोऽयम् ॥ १ ॥

O dear, the Hemanta has set in. In this season the herbs have become beautiful with the growth of new leaves, the Lodhra trees have blossomed, the paddy has ripened, the lotus is being blown up and heavy dews are falling. 1

मनोहरैः कुङ्कुमरागरक्तैस्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीनां नार्लंक्रियन्ते स्तनमण्डलानि ॥ २ ॥

The breasts of women, having beautiful breasts, are not being dyed with red arsenic and necklace having the Kunda flowers and the moon the charm of snow. 2

न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बबिम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥

Bangles and ornaments are not finding room on the arms of women and thin cloth is not finding room on their waists and breasts. 3

काञ्चीगुणैः काञ्चनरत्नचित्रैर्नो भूषयन्ति प्रमदा नितम्बम् ।
न नूपुरैर्हंसरुतं भजद्भिः पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥

The damsels are not decorating their waists with chains of gold set with gems and their lotus feet with Nupuras resorting to the of resonance swans. 4

गात्राणि कालीयकचर्चितानि सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥

For celebrating the festival of sexual intercourse the women are dying their bodies with turmeric, decorating their lotus-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

like countenances with leaves and perfuming their heads with black Aguru and incense. 5

रतिश्रमक्षामविपाण्डुवक्त्राः सम्प्राप्तहर्षाभ्युदयास्तदग्र्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान् प्रपीड्यमानानधरानवेक्ष्य ॥ ६ ॥

The countenances of women have become weak and pale with the toil of sexual intercourse; on account of growing joy they are not laughing aloud on seeing lips wounded with teeth. 6

पीनस्तनोरः स्थलभागशोभामासाद्य तत्पीडनजातखेदः ।
तृषाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकालः ॥ ७ ॥

The winter has occupied the breasts and thighs of women; and being weakened by their oppressions they are weeping in the morning with tears falling in the shape of dews from leaves. 7

प्रभूतशालिप्रसवैश्चितानि मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥

The boundary lines, being covered with profuse paddy beautified with the she-deer and resonant with cries of beautiful Krounchas moving about on all sides, are gladdening the minds of the people. 8

प्रफुल्लनीलोत्पलशोभितानि सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि सरांसि चेतांसि हरन्ति पुंसाम् ॥ ९ ॥

Adorned with full blown red lotuses, maddened geese and clear water, the cool lakes are pilfering the hearts of e men. 9

पाकं व्रजन्ती हिमजातशीतैराधूयमाना सततं मरुद्भिः ।
प्रिये प्रियंगुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव ॥१०॥

O dear, the Priyangu creepers are being continually shaken by the breeze, cooled by snow, riping and looking pale like, women stricken with the absence of their husbands. 10

पुष्पासवामोदिसुगन्धिवक्त्रो निःश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्ग्यतिरिक्तशायी शेते जनः कामरसानुविद्धः ॥११॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

The mouths of men are being perfumed by drinking the honey of flowers and their persons are being scented with breaths. Desirous of holding sexual intercourse they are lying down embracing each other. 11

दन्तच्छदैः सव्रणदन्तचिह्नैः स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां रतोपयोगो नवयौवनानाम् ॥१२॥

The merciless sexual intercourse of youthful damsels has manifested itself in the lips marked with cuts of teeth and breasts wounded with nails. 12

क्वचिद् विभूषयति दर्पणसक्तहस्ता बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं दन्ताग्रभिन्नमवकृष्य निरीक्षते च ॥१३॥

Some women, holding up mirrors, are decorating their lotus faces in the new beams of the sun and biting their lips already bitten by their lovers. 13

४०४

अन्या प्रकामसुरताश्रमखिन्नदेहा रात्रिप्रजागरविपाटलनेत्रपद्मा ।
न्यस्तांसदेशलुलिताकुलकेशपाशा निद्रां प्रयाति मृदुसूर्यकराभितप्ता ॥१४॥

Some woman has been greatly exhausted with the toil of sexual intercourse. Her eyes have become reddened with night-keeping. And keeping her scattered hairs on the end of the bed and being heated by the mild rays of the sun she is sleeping. 14

निर्माल्यदाम परिमुक्तमनोज्ञगन्धं मूर्धोऽपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः कुर्वन्ति केशरचनामपरास्तरुण्यः ॥१५॥

Another woman, looking beautiful with her black tresses, and pressed down with the weight of her rising breasts, is dressing her hairs, removing therefrom the garlands used before the sweet scent whereof has disappeared. 15

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं हर्षान्विता विरचिताधरचारुशोभा ।
कूर्पासकं परिदधाति नखक्षताङ्गी व्यालम्बिनीललसितालककुञ्चिताक्षी ॥१६॥

Seeing her own person enjoyed by her lover and accordingly filled with delight another youthful damsel is increasing the

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

beauty of her lips. Drawing her hairs for binding them into tresses she is contracting a little her eye-brows. And she is putting on a new cloth. 16

अन्याश्चिरं सुरतकेलिपरिश्रमेण खेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।
संहृष्यमाणपुलकोरुपयोधरान्ता अभ्यञ्जनं विदधति प्रमदाः सुशोभाः ॥१७॥

Some beautiful damsels have been greatly worn out with the toil of sexual intercourse. Their limbs have been exhaust ed and ther capacious thighs and breasts have swollen. They are rubbing their persons with sweet-scented oil and turmeric. 17

बहुगुणरमणीयो योषितां चित्तहारी परिणतबहुशालिव्याकुलग्रामसीमा ।
सततमतिमनोज्ञ क्रौञ्चमालापरीतः प्रदिशतु हिमयुक्तः काल एषः सुखं वः ॥१८॥

The boundaries of the villages have been covered with ripe paddies. May this Hemanta, the mine of many virtues, the pilferers of the hearts of charming women ,and reasonant with the notes of Kraunchas, conduce to your happiness. 18

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चमः सर्गः

A DESCRIPTION OF THE WINTER.

प्ररूढशाल्यंशुचयैर्मनोहरं क्वचित्स्थितक्रौञ्चनिनादराजितम् ।
प्रकामकामं प्रमदाजनप्रियं वरोरु काल शिशिराह्वयं शृणु ॥ १ ॥

O thou of most excellent thighs, listen to an account of the winter—when the earth is covered with paddy and sugar-candy, when the Krounchas emit notes at their sweet pleasure and when all sorts of enjoyments attain to their consummation-the winter which is favourite unto women. 1

निरुद्ध वातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः प्रयान्ति कालेऽत्र जनस्य सेव्यताम् ॥२॥

In this season, rooms with windows closed, fire, the rays of the sun, and women clad in thick clothes are the objects of enjoyment unto men. 2

न चन्दनं चन्द्रमरीचिशीतलं न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।
न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति साम्प्रतम् ॥३॥

Sandal, cool like the rays of the moon, the roof of mansions, clear like the autumnal oon, breeze cooled by snow cannot attract the mind of men in this season, 3

तुषारसङ्घातनिपातशीतलाः शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणजिह्मभूषिता जनस्य सेव्या न भवन्ति रात्रयः ॥४॥

In this season people do not like places cool with the fall of dews and the night cooled with the rays of the moon and adorned with stars. 4

गृहीततताम्बूलविलेपनस्रजः सुखासवामोदितवक्त्रपङ्कजाः ।
प्रकामकालागुरुधूपवासितं विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥५॥

Eating betel leaves in great anxiety, wearing pastes and garlands and perfuming their faces with the honey of flowers the women are entering into bed rooms sufficiently perfumed with black Aguru. 5

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतापराधान् बहुशोऽपि तर्जितान् सवेपथून् साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन् सुरताभिलाषिणः स्त्रियोऽपराधान् समदा विसस्मरुः ।६।।

Beholding their husbands, offending, trembling and scolded, the women, inebriate with drinking honey, are forgetting their previous offences being desirous of holding sexual intercourse. 6

प्रकामकामैर्युवभिः सनिर्दयं निशासु दीर्घास्वभिरामिताश्चिरम् ।
भ्रमन्ति मन्दं श्रमखेदितोरसः क्षपावसाने नवयौवनाः स्त्रियः ।।७।।

Being kept up till late hours by cruel youths engaged in sexual intercourse, these youthful damsels, with their breasts perspiring, walk slowly in the morning. 7

मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयकभूषितोरसः ।
निवेशितान्तः कुसुमैःशिरोरुहैर्विभूषयन्तीव हिमागमं स्त्रियः ।।८।।

With their breasts adorned with beautiful filaments, waists clad in silken raiments and tresses bedecked with flowers the damsels are beautifying, the more the winter. 8

पयोधरैः कुङ्कुमरागपिञ्जरैः सुखोपसेव्यैर्नवयौवनोष्मभिः ।
विलासिनीभिः परिपोडितोरसः स्वपन्ति शीतं परिभूय कामिनः ।।९।।

Rendered tawny by the red arsenic dyes of women and pressed and protected by their enjoyable breasts the source of heat the lustful persons are sleeping at ease after defeating the winter. 9

सुगन्धिनिश्वासविकम्पितोत्पलं मनोहरं कामरतिप्रबोधकम् ।
निशासु हृष्टाः सह कामिभिः स्त्रियः पिबन्ति मदयं मदनीयमुत्तमम् ।।१०।।

In winter nights are filled with delight, women drink in the company of their husbands, most excellent wines, shaken by the sweet-scented breath and capable of creating exhilaration and desire. 10

अपगतमदरागा योषिदेका प्रभाते कृतनिविडकुचाग्रा पत्युराश्लिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं व्रजति शयनवासाद्ध्रासमन्यद्वसन्ती ।।११।।

Seeing, after the intoxication is over, her own person enjoyed by her lover some one amongst women, with breasts pressed down by the embrace of her dearest, is leaving smilingly her sleeping apartment for another room. 11

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अगुरुसुरभिधूपामोदितं केशपाशं गलितकुसुममालं तन्वती कुञ्चिताग्रम् ।
त्यजति गुरुनितम्बा निम्नमध्यावलाना ह्युषसि शयनमन्या कामिनी चारुशोभा ॥११॥

With fading garlands sweet-scented with Aguru and dishevelled curling locks some one, having capacious waist, deep navel and of a middle stature, is leaving in the morning her bed-chamber for another room. 12

कनककमलकान्तैः सद्य एवाम्बुधौतैः श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।
उषसि वदनबिम्बैरंससंसक्तकेशैः श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥१३॥

Adorned with eyes beautiful like golden lotuses, extending up to ears, washed immediately with water and having their extremities reddened, as well as with countenances with tresses hanging on the shoulders, some women are appearing highly beautiful in their rooms in the morning. 13

पृथुजघनभरार्त्ताः किंचिदानम्रमध्याः स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः ।
सुरतसमयवेशं नैशमाशु प्रहाय दधति दिवसयोग्यं वेशमन्यास्तरुण्यः ॥१४॥

Pained with the weight of their capacious backs and as well as with that of their rising breasts some women are going slowly; and casting off their night dresses they are putting on those fit to be worn during the day. 14

नखपदचितभागान्वीक्षमाणाः स्तनाग्रानधरकिशलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमतरसमेतं नन्दयन्त्यस्तरुण्यः सवितुरुदयकाले भूषयन्त्याननानि ॥१५॥

Marking the disfigurement of their breasts caused by the hands and nails of their lovers, and touching the tip of their lips disfigured by teeth, the damsels are beautifying the faces at the rising of the sun. 15

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः प्रबलसुरतकेलिर्जातकन्दर्पदर्पः ।
प्रियजनरहितानां चित्तसंतापहेतुः शिशिरसमय एष श्रेयसे वोऽस्तु नित्यम् ॥१६॥

During this season molasses, Shaly paddies and sugar canes are produced in abundance. Desire for enjoyments and luxuries increases and therefore the minds of those whose lovers are away are greatly agitated. O dear, may this winter conduce to your well being always. 16

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षष्ठः सर्गः

A DESCRIPTION OF THE SPRING.

प्रफुल्लचूताङ्कुरतीक्ष्णसायको द्विरेफमालाविलसद्धनुर्गुणः ।
मनांसि वेन्द्धुं सुरतप्रसङ्गिनां वसन्तयोद्धा समुपागतः प्रिये ! ॥ १ ॥

O dear, having mango blossoms or his sharp arrows and black bees for the string of his bow, the foremost of heroes Basanta (Spring) has come for rending the hearts of pleasure-seeking persons. 1

द्रुमाः सुपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः सर्वं प्रिये ! चारुतरं वसन्ते ॥ २ ॥

Now the trees are covered with flowers, the lakes are full of lotuses, the women are anxious for enjoyments, the wind is full of perfume, the winds are delightful and the days are beautiful. O dear, everything is beautiful during the spring. 2

वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमान्वितानां ददाति सौभाग्यमयं वसन्तः ॥ ३ ॥

This highly charming spring multiplies the beauty of the water of the lakes, of the jewelled girdle, of the lunar rays, of mango trees bent down by blossoms. 3

कुसुम्भरागारुणितैर्दुकूलैर्निंतम्बबिम्बानि विलासिनीनाम् ।
रक्तांशुकैः कुङ्कुमरागगौरैरलंक्रियन्ते स्तनमण्डलानि ॥ ४ ॥

During the spring the pleasure-seeking women, increase, the beauty of their waists, with their raiments coloured with Kusamba flowers and that of their breasts with those coloured with red arsenic. 4

कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम् ।
पुष्पं च फुल्लं नवमल्लिकायाः प्रयाति कान्तिं प्रमदाजनस्य ॥ ५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

The beauty of full blown Mallika flowers is manifest in new Karnikara flowers serving for the ear-rings of women and in Asoka flowers decorating their black and curling locks. 5

स्तनेषु हाराः सितचन्दनार्द्रा भुजेषु सङ्गं वलयाङ्गदानि ।
प्रयान्त्यनङ्गातुरमानसानां नितम्बिनीनां जघनेषु काञ्च्यः ॥ ६ ॥

They have put on their breasts chains pasted with white sandal, on their arms armlets, on their hands bracelets and on their waists girdles. 6

सपत्रलेखेषु विलासिनीनां वक्त्रेषु हेमाम्बुरुहोपमेषु ।
रत्नान्तरे मौक्तिकसङ्गरम्यः स्वेदागमो विस्तरतामुपैति ॥ ७ ॥

Drops of perspiration on the breasts and faces of women, resembling golden lotuses and adorned with sandal marks, are appearing like pearls born on their limbs. 7

उच्छ्वासयत्यन्यः श्लथबन्धनानि गात्राणि कन्दर्पसमाकुलानि ।
समीपवर्तिष्वधुना प्रियेषु समुत्सुका एव भवन्ति नार्यः ॥ ८ ॥

Raiments are dropping down from their limbs assailed by the lovers with their enjoyments, lend when they are approaching them the women are anxious to embrace them. 8

तनूनि पाण्डूनि समन्थराणि मुहुर्मुहुर्जृम्भणतत्पराणि ।
अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्य-संसम्भ्रमाणि ॥ ९ ॥

The limbs of the women have become weak and pale with sexual intercourse, anxious thoughts and night-keeping. They are sighing again and again in idleness, Ananga (Cupid) is making women (even in this plight) anxious to decorate their bodies and engage in enjoyments, 9

नेत्रेषु लोलो मदिरालसेषु गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः स्त्रीणामनङ्गो बहुधा स्थितोऽत्र ॥१०॥

Kama is living in many forms on the persons of women—in their eyes worn out with intoxication, in their fickleness, in paleness of their breasts, in the depth of their navels, and spaciousness of their backs. 10

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अङ्गानि निद्रालसविभ्रमाणि वाक्यानि किंचिन्मदलालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि चकार कामः प्रमदाजनानाम् ॥११॥

Ananga has made the limbs of women exhausted with night-keeping, as caused faltering in their speech with the drinking of wine and brought about the contraction of their eye-brows. 11

प्रियङ्गुकालीयककुङ्कुमार्क्तं स्तनेषु गौरेषु विलासिनीभिः ।
आलिप्यते चन्दनमङ्गनाभिर्मदालसाभिर्मृगनाभियुक्तम् ॥१२॥

The damsels, exhausted with intoxication, are pasting their limbs and breasts with Pryangu, black Aguru, red arsenic and sandal scented with musk. 12

गुरूणि वासांसि विहाय तूर्णं तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागरुधूपितानि धत्तेऽङ्गना कामममदाखसाक्षी ॥१३॥

Casting off thick raiments, men, pierced by the shafts of Kandarpa, are putting on dyed clothes perfumed with black Aguru. 13

पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः ।
कूजद्द्विरेफोऽप्ययमम्बुजस्थः प्रियं प्रियायाः प्रकरोति चाटु ॥१४॥

The male cuckoos, maddened with drinking the honey of mango blossoms, are kissing with joy their mates. Humming sweetly the black-bees, intent on drinking the honey of lotuses are enlivening dear ones. 14

ताम्रप्रवालस्तबकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम् ॥१५॥

The mango trees have been bent down a little with the weight of new red leaves, and blossoming their branches have put on a beautiful appearance. Shaken by the wind these mango trees are agitating the minds of women. 15

आमूलतो विद्रुमरागताम्रं सपल्लवाः पुष्पचयं दधानाः ।
कुर्वन्त्यशोका हृदयं सशोकं निरीक्ष्यमाणा नवयौवनानाम् ॥१६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Covered up to roots with flowers dark-blue like lotus the blossoming Asoka trees are exciting the sorrow of separation in the minds of women. I6

मत्तद्विरेफपरिचुम्बितचारुपुष्पा मन्दानिलानुकुलितनवमृदुप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं चूताभिरामकलिकाः समवेक्षमाणाः ॥१७॥

Seeing the maddened black-bees kiss the beautiful flower of the Madhavi creepers adorned with tender leaves shakens slowly by the breeze, the minds of pleasure-seeking men are worked up with desire, 17

कान्तामुखेषु तिजुषामपि चोन्द्गतानां शोभां परां कुरबकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य कन्दर्पबाणपतनव्यथितं हि चेतः ॥१८॥

Who is there a conscious man whose mind is not pained with the arrows of Kandarpa on seeing the grace of the new grown blossoms of Kuruvaka trees pilfering the beauty of their dear wives. I8

आदीप्तवह्निसदृशैर्मरुतावधूतैः सर्वत्र किंशुकवनैः कुसुमावनम्रैः ।
सद्यो वसन्तसमये हि समाचितेयं रक्ताशुंका नववधूरिव भाति भूमिः ॥१९॥

With the advent of the spring the trees are being slowly shaken by the breeze. Adorned all over with the forest- of Asoka trees bent down with flowers resembling burning fire, the earth is looking like a forest damsel clad in a crimson coloured raiment. I9

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं किं कर्णिकारकुसुमैर्न कृतं नु दग्धम् ।
यत्कोकिलः पुनरयं मधुरैर्वचोभिर्यूनां मनः सुवदनानिहितं निहन्ति ॥२०॥

Are not the hearts of young men and women rent asunder by the blossoming of Kinsuka flowers crooked like the eyes of Shuka birds ? Are they not scorched by the Karnikara flowers ? Again the coels are killing them completely with their sweet notes. 20

पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥२१॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Even the minds of bashful and gentle women of good families are being agitated in the spring by the notes of joyous coels and the humming of black-bees. 21

आकम्पयन् कुसुमिताः सहकारशाखा विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन्नराणां नीहारपातविगमात्सुभगो वसन्ते ॥२२॥

In the spring, with the termination of the winter, the slow and sweet breeze, shaking the blossoming branches of mango trees, spreading on all sides the notes of euckoos is blowing pilfering the hearts of men. 22

कुन्दैः सविभ्रमबधूहसितावदातैरुद्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं प्रागेव रागमलिनानि मनांसि यूनाम् ॥२३॥

Beautiful gardens, adorned with Kunda flowers white like the smiles of damsels, are stealing away even the minds of the asceties shorn of the desire for enjoyment. They have already pilfered the minds of young men, stained with the desire for worldly enjoyments. 23

आलम्बिहेमरसनाः स्तनसक्तहाराः कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
माले मधौ मधुरकोकिलभृङ्गनादैर्नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥ २४ ॥

With golden girdles hanging on their waists and necklaces adorning their rising breasts the pleasure seeking women, with the help of the notes of coels and black-bees, are pilfering the minds of men in the month of Chaitra. 24

नानामनोज्ञकुसुमद्रुमभूषितान्तान् हृष्टान्यपुष्टनिनदाकुलसानुदेशान् ।
शैलेयजालपरिरुद्धशिलातलौघान् दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥२५॥

Beholding the mountains, adorned with various blossoming trees and resonant with the notes of coels men are experiencing great delight. 25

नेत्रे निमीलयति रोदिति याति शोकं घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति दृष्ट्वाध्वगः कुसुमितान् सहकारवृक्षान् ॥२६॥

Seeing the blossoming mango trees the traveller, with his mind stricken with separation from his dear wife, is opening

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

his eyes, weeping, expressing sorrow, covering his nose with his hand and exclaiming cries of despair. 26

समदमधुकराणां कोकिलानां च नादैः कुसुमितसहकारैः कर्णिकारैश्च रम्यः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां तुदति कुसुममासो मन्मथोद्वेजनाय ॥२७॥

With the humming of black-bees inebriete with honey, notes of Kokilas, mango blossoms and charming Karnikara-like arrows the spring is continually wounding the hearts of sensitive women. 27

आम्रीमञ्जुलमञ्जरीवरशरः सल्किंशुकं यद्धनु-
र्ज्या यस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तोभो मलयानिलः परभृतो यद्वन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥ २८ ॥

With beautiful mango blossoms for his arrows, Kingsuka flowers for his bow, black-bees for his bowstring' the moon for his umbrella, the southern wind for his infuriated elephant and the coels for his panegyrists may the god Kama, with his companion Spring, do good unto all. 28

रुचिरकनककान्त मुञ्चतः पुष्पवृन्दं, मृदुपवन विधूतान् पुष्पितांश्चूतवृक्षान् ।
अभिमुखमाभिवीक्ष क्षामदेहोऽपि मार्गे, मदनशरिसुविद्धो मोहमेति प्रवासी ॥२९॥

Seeing on the road mango trees like unto gold shaken by the breeze, pouring flowers, the travellers, whose weak body is not worthy of being struck, are swooning away being wounded with the shafts of Madana. 29

परभृतकलगीतै र्ह्लादिभिः सद्वचांसि, स्मितदशन मयूरवं कुन्द पुष्पप्रभाभिः ।
करकिशलयकान्ति पल्लवै र्विद्रुमाभिर्, अभिभवतिवसन्तः कामिनीनामिदानीं ॥३०

The spring is mocking at the sweet words of women by the sweet notes of the Kokilas, at their smiling teeth by the beauty of Kunda flowers and at their palms by new grown leaves. 30

कनककमलकान्तैराननैः पाण्डुगण्डैर्, उपनिहितसुहारैश्चन्दनार्द्रैः स्तनाग्रैः ।
मदन जनितलासैः सालसदृष्टिपातैर् मुनिवरमपिनार्यःकामयन्ते वसन्ते ॥३१॥

With theri charming, pale and lotus-like countenances

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

resembling golden lotuses, with breasts pasted with sandal and decorated with necklace, and with inebriete glances the women are creating desire even in the minds of self-controlled Munis. 31

मधुसुरभिमुखाब्जं लोचनेलोलतारे, नवकुरवकपूर्णः केशपाशो मनोज्ञः ।
अतिगुरु कुचयुग्मं श्रोणिबिम्बं तथैव न भवतिकिमिदानीं योषितां भ्रू हिचारु ॥३२॥

Of the lotus-like countenances perfumed with honey, of women, their eyes reddened a little like Lodhra flowers, beautiful tresses like Kuruvaka flowers, rising breasts and waists which is it that does not excite desire in the spring ? 32

आकम्पितानि हृदयानि मनस्वनीनां, वातैः प्रफुल्लसहकारकजा घवासैः ।
उत्कूजितैः परभृतस्य मदाकुलस्य, श्रोत्रप्रियैर्मधुकरस्य च गीतशब्दैः ॥३३॥

In this season even the firm-minded women are being worked up by the breeze perfumed with mango blossoms, and assailed by the notes of Kokilas and the humming of black-bees. 33

रम्यप्रदोषसमयः । स्फुटचन्द्रभासः पुंस्कोकिलस्य विरुतं पवनः सुगन्धः ।
मत्तालियूथ विरुतं निशि सीधुपानं, सर्वं हि साधनमिदं कुसुमायुधस्य ॥३४॥

The charming evening, clear lunar rays, notes of male coels the sweet scented breeze, the humming of maddened black-bees, and drinking in the night—all these excite the desire. 34

छायां जनः समभिवाञ्छति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलं च
कान्तां च गाढमुपगूहति शीतलत्वात् ॥३५॥

In this season men love shade of the trees in the day and the rays of the moon in the night. They lie down in cool mansions and embrace their lady loves. 35

———

THE END.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

COMPLETE WORKS
OF
KALIDASA

Text, English translation with Introduction Notes and Appendices translated by renowned English writers like H. H. Wilson, C.H. Tawney and Sir William Jones. Cloth bound, Demy 8vo in two Volumes: Edited by Sri Rewa Prasad Dwivedi M.A. Acharya.

Vol, I. Poetry.

1. Raghuvamsam 2. Kumara Sambhavam. 3. Megha Dutam 4. Ritusamharam

Vol, II. Drama.

1. Shakuntalam 2. Malavikagnimitram. 3. Vikramorvasiyam

Price 25.00 for the complete set,

The above translation which were published without the Sanskrit Text, were out of print for a pretty long time and were in demand. In some places where the translation was either omitted or was found incomplete, the same has been added, completed and amended. In spite of high price of paper and printing, the price has been fixed most moderately.

The above books can be had separately also against the prices noted below:—

1. Raghuvamsam complete	Rs 7,00	Tr. H. H, Wilson
2. Kumar Sambhavam ,,	,, 6–00	do
3. Meghadutam ,,	,, 2-00	do
4. Ritusamharam ,,	,, 1–50	do
5. Shakuntalam	,, 6-00	Sir William Jones
6. Malavikagnimitram	4–00	C. H. Tawney
7. Vikrmaorvashiam	4–00	H. H. Wilson